# प्रथमोऽध्यायः

## (१) पुराणवाङ्मयस्य वैशिष्ट्यं महत्त्वञ्च

### (क) संस्कृतभाषामहत्त्वम् –

संस्कृतभाषा देववाणीत्यभिधानेन प्रसिद्धमुपगतास्ति लोके । भाषैषा किमर्थमभिधीयते देववाणीति ? देवैः व्यवह्रियमाणत्वात् संस्कृतं देववाणीत्युच्यत इति धारणा वर्तते । ब्रह्मविष्णुमहेश्वरादयः प्रमुखाः देवाः अपरे चान्ये देवाः संस्कृतेनैव संलपन्ति । तस्मादेव व्यवहारप्रयुक्ता एषा देववाणीति नाम्ना ख्याता भुवि ।

सकलसंसारे याः भाषाः सन्ति तासु भाषासु संस्कृतभाषा श्रेष्ठा गरिष्ठा परिपूर्णा च वर्तते । प्राचीनैः ऋषिभिर्मुनिभिश्च भाषागतदोषपरिष्कारेण अपशब्दादिदोषवारणेन या परिष्कृता भाषा व्यवहारे प्रयुक्ता सैव संस्कृतनाम्ना सम्बोध्यते प्रशस्यते आद्रीयते च ।

संस्कृतं हि देवी वागन्वाख्याता महर्षिभिः ।

भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती ॥

का नाम भाषा ? –

विषयस्यास्यात्र चर्चा क्रियते ।

भाष् व्यक्तायां वाचि धातोः टाप् प्रत्यये कृते सति भाषाशब्दः निष्पन्नो जातः । भाषायाः स्वरूपं निरूप्यतेऽत्र, विद्वद्वर्येण डॉ. कपिलदेवद्विवेदिमहाभागेन अभिहितम् –

स्फुटवाक्करणोपात्तो, भावाभिव्यक्तिसाधकः ।

संकेतितो ध्वनिव्रातः सा भाषेत्युच्यते बुधैः ॥

ध्वन्यात्मकैः शब्दैः विचारप्रकटीकरणमेव भाषास्ति । महर्षिणा महाभाष्यकारेण पतञ्जलिनाप्युक्तं भाषाविषयकं तथ्यमिदम् –

"व्यक्ता वाचि वर्णा येषां त इमे व्यक्त वाचः"[१]

स्वमनसि उत्पन्नान् भावान् सर्वेषां जनानां समक्षे प्रकटीकरणस्य यत्साधनं सैव भाषास्ति ।

स्वकीयं भाषाविषयकं महनीयं विचारं प्रकटयन् महर्षिः पाणिनिः स्वकीये ग्रन्थे पाणिनीयशिक्षायां अलिखत् –

आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया ।

मनः कायाग्निमाहन्ति, स प्रेरयति मारुतम् ॥६॥

मारुतस्तूरसि चरन्, मन्द्रं जनयति स्वरम् ।

प्रातः सवनयोगं तं , छन्दो गायत्रमाश्रितम् ॥७॥

[1] महाभाष्यम्

सोदीर्णो मूर्धन्यभिहितो, वक्त्रमापाद्य मारुतः ।

वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥९॥

स्वरतः कालतः स्थानात्, प्रयत्नानुप्रदानतः ।

इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥१०॥[1]

शरीरस्थात्मा बुद्ध्या सह अर्थान् बाह्यान् समेत्य सम्यगवगम्यार्थप्रत्यायनाय यदा शब्दा उच्चार्यन्ते, तदा मनो युङ्क्ते वक्तुमिच्छया तच्च मनो नियुक्तं सत् जठराग्निं आभिमुख्येन आहन्ति, सोऽग्निरभिहतः सन् मारुतं वायुं प्रेरयति । मारुतस्तु उरसि उद्भावयन् हृद्देशे परिभ्रमन् मन्दं स्वरम् उत्पादयति । ततः स ऊर्ध्वगतोवायुः मूर्द्धानं यावत् ऊद्ध्र्वगतिं प्राप्य, गिरः कपालेन अवष्टब्धत्वात् पुनः प्रत्यावृत्य वक्त्रमेव आपाद्य वर्णानुत्पादयति । तेषां वर्णानां विभागः पञ्चधा स्मृतः , यथा स्वरतः , कालतः, स्थानतः, आभ्यन्तरप्रयत्नतः, बाह्यप्रयत्नतश्च ।

इत्थं महर्षिणा पाणिनिना अतीववैज्ञानिकं भाषाविषयकवर्णोत्पत्तिसिद्धान्तस्य निरूपणं कृतमिति । अनेन सुस्पष्टमिदं यत् मानवशरीरस्य स्वरयन्त्र–मुख–तालु–जिह्वाद्युच्चारणावयवेभ्यः निःसृता वर्णसंहृतिः पदावली वा भाषा इत्यभिधीयते ।

सृष्टेः अनादिकालादेव भाषा प्रसृता । ततः प्रभृति अद्यावधिपर्यन्तं भाषास्वरूपाणि प्रचलितानि । तद्यथा– पूर्वं वैदिकसंस्कृतभाषा ततः परं पुराणप्रयुक्ता संस्कृतभाषा । वैदिक – ऋषिभिः या भाषा प्रयुक्ता सातिरूढा दुरूहा

---

[1] पाणिनीयशिक्षायाम् ६–७, ९–१०

दुर्बोधा च वर्तते । पुराणप्रयुक्तभाषा व्यासादिभिः या प्रयुक्ता सा सहजा सुबोधा सुगम्या सरला च दृश्यते । अनेन कारणेनैव लोकेषु पुराणानि लोकविश्रुतानि जातानि ।

(ख) पुराणशब्दस्य व्युत्पत्तिः

भारतीयसंस्कृतेः प्रतीकवैदिकसनातनधर्मस्य परम्परायाश्च विशिष्टस्थानमिति समग्रे विश्वे । अस्माकं संस्कृतेः स्वरुपं किमिति सम्यग् अवबोधनाय पुराणानामध्ययनस्य महती आवश्यकता वर्तते । सर्वेषु पुराणेष्वन्यतमस्य श्रीमद्भागवतमहापुराणस्य परिचयप्रसङ्गे प्राथम्येन पुराणशब्दस्य व्युत्पत्तिः प्रदीयते ।

पुराणशब्दस्य व्युत्पत्तिर्विषये अनेकैः विद्वद्भिः स्व–स्वमतानि प्रस्थापितानि । 'पुरा भवम्' इत्यर्थे "सायं–चिरं–प्राह्ने–प्रगेऽव्ययेभ्यष्ट्यु–ट्युलौ तुट् च"[1] इत्यनेन पाणिनिसूत्रेण पुराशब्दात् 'ट्यु' प्रत्यये कृते तुडागमाभावे तु पुराणशब्दः संसिध्यति ।

पुरति अग्रे गच्छतीति पुरा, तुदादिगणपठित्वात् पुर अग्रगमने इति धातोः औणादिके 'का' प्रत्यये कृते पुराशब्दो निष्पद्यते योऽव्ययो मन्यते । मेदिनीकोशाधारेण अयं शब्दः त्रिष्वर्थेषु प्रयुज्यते –

१. प्रबन्धार्थे ।

२. अतीतकालार्थे ।

३. संकटार्थे च ।

---

[1] पाणिनि–अष्टाध्यायी ४/३/२३

स्यात् प्रबन्धे पुरातीते संकटगामिके तथा ।[१]

पुराणशब्दस्य प्रयोगः कस्मिन् लिङ्गे प्रयुक्तो जातः ? । पुरापूर्वकात् देवादिकादण् प्राणने इति धातोः पचाद्यति कृते पुराणशब्दो निष्पद्यते । अच् प्रत्ययान्तत्वात् घञ् जपः पुंसि इत्यनुसारेण पुराणशब्दस्य प्रयोगः पुलिङ्गे प्रयुज्यते, परञ्च अनेकेषु ग्रन्थेषु पुराणेष्वपि शब्दस्यास्य प्रयोगः नपुंसकलिङ्गेऽपि भवतीति । यथा –

पुराणं पञ्चलक्षणम् ।[२]

पुराणं षोडशपणे पुराणं प्रत्नशास्त्रयोः ।[३]

पुराणं ग्रन्थभेदे च क्लीवे त्रिषु पुरातने ।[४]

इत्याद्यनुसारेण पुराणशब्दस्य नपुंसकलिङ्गे प्रयोगो भवति । पाणिनेः अष्टाध्याय्यां पुराणशब्दस्य प्रयोगः प्रसिद्धः वर्तते । “पूर्वकालैकसर्वजरत्पुराण–नवकेवलासमानाधिकरणेन”[५] तथा “पुराणप्रोक्तेषु ब्राह्मणकल्पेषु”[६] इति । अनेन सिद्ध्यति पुराशब्दात् व्युप्रत्ययो भवति, परं सूत्रप्राप्ततुडागमस्तु निपातान्न भवति । प्राचीनार्थे पूर्वकालिकेत्याद्यर्थे च पुराणशब्दस्य प्रयोग उपलभ्यते । महर्षिणा यास्काचार्येण स्वकीये निरुक्तग्रन्थे पुराणशब्दस्य निर्वचनं कुर्वता प्रोक्तमस्ति यत् “पुरा नवं भवति”[७] इत्यर्थे व्युत्पादयति पुराणशब्दस्य । पुराणं कर्मादुच्यते ? अतो यत् कदापि पूर्वं नवं स्यात् निरुक्ते यास्काचार्यस्य एवंप्रकारेण निर्वचनेन पुराणे

---

[1] मेदिनीकोशे पृ. १५

[2] मत्स्यपुराणे ५/४०

[3] हेमचन्द्रकोषे पृ. १३ प. ७

[4] रत्नमाला पृ. ७७ प. ८

[5] पाणिनी–अष्टाध्यायी २/२/११

[6] पाणिनी–अष्टाध्यायी ४/३/१०५

[7] निरुक्ते पृ. १५४

नवीनतायाः भावो नास्ति किन्तु पुराणशब्दस्यार्थः प्राचीनोऽस्ति । पुराणेष्वपि अस्य प्रयोगो दृष्टव्यः । वायुपुराणे –

यस्मात्पुरा ह्यनतीदं पुराणं तेन तत्स्मृतम् ।[१] इति ।

पद्मपुराणे च –

पुरा परम्परां वक्ति पुराणं तेन तत्स्मृतम् ।[२]

अनेकैः पूर्वाचार्यैः पूर्वोक्तव्युत्पत्तिभ्यो विज्ञायते यत् पुराणवर्ण्यविषयस्य सम्बन्धः पूर्वकालतः एवास्ति । पुराणेन सह इतिहासस्याप्यधिकमहत्त्वं दरीदृश्यते ।

इतिहासपुराणं च पञ्चमो वेद उच्यते ।[३]

इतिहासपुराणयोः अनयोः पञ्चमो वेदः स्वीकृतः । इतिहासशब्दस्य विषयेऽपि अत्र वर्णनं प्रस्तौमि ।

(ग) इतिहासशब्दस्य व्युत्पत्तिः

पुराणेन सह इतिहासस्यापि अन्यतमः घनिष्ठतमः सम्बन्धः वर्तते । प्राचीनेषु ग्रन्थेषु पुराणेतिहासयोः नाम सम्मिलितरूपेण साकर्मेणोपलभ्यते । इतिहासशब्दस्य व्युत्पत्तिः – इति – इत्थं, ह – निश्चयं, आस–बभूव इत्यर्थः । पूर्वकाले निश्चयरूपेण घटितेयं घटना 'इतिहासः' इत्युच्यते । यथा निरुक्ते दृष्टव्यम्–

इति ह एवमासीत् इति य उच्यते स इतिहासः ।[४]

छान्दोग्योपनिषदि –

---

[1] वायुपुराणे १/२०२

[2] पद्मपुराणे १/२/५३

[3] श्रीमद्भागवते १/४/२०

[4] निरुक्त २/३/१ निरुक्ते दुर्गाचार्यवृत्ति

इतिहासपुराणं पञ्चमं वेदानां वेदम् ।[1]

एवं परस्परं पुराणे इतिहासशब्दस्य इतिहासे च पुराणशब्दस्यापि प्रयोगो दृश्यते । महाभारते –

द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा ।[2]

मत्स्यपुराणेऽपि च –

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।[3]

पुराणमहाभारतयोः इतिहासशब्देन द्योतते, किन्तु इतिहासशब्दस्य प्रयोगः महाभारतयधिकं प्रयुज्यते । ब्रह्मवैवर्तपुराणस्य कृष्णजन्मखण्डानुसारं महाभारतमितिहासः वाल्मीकिरामायणं च काव्यमित्युच्यते –

इतिहासो भारतं च वाल्मीकं काव्यमेव च ।[4]

अतः इतिहासशब्दस्य व्युत्पत्तिलभ्यार्थः प्राचीनकालिको वास्तविकार्थ एव निश्चयं हि पूर्वकालवृत्तिवर्ण्यविषयाणामेव द्योतकः ।

एतैः प्रमाणैः ज्ञायते यत् पुराणेतिहासशब्दयोर्मध्ये बहु सामीप्यमस्ति, किन्तु यदि अस्मिन् विषये किञ्चिद् विचार्यते तर्हि किञ्चिदन्तरमायाति । तद्यथा प्रेरककाल्पनिककथा आख्यानं वा पुराणम् अथ च वास्तविकयथार्थघटनापरक इतिहास ज्ञातुं शक्यते । महर्षिणा व्यासेन महाभारते महाभारतस्य विषये निगदितं यत् –

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ॥[1]

---

[1] छान्दोग्यपनिषदि ७/१/२
[2] महाभारते १/१/१७
[3] मत्स्यपुराणे ७२/६
[4] ब्रह्मवैवर्तपुराणे १३१/२३

अतः पुराणेतिहासे ये विषयाः सन्ति ते विषयाः समग्रे विश्वे समस्तशास्त्रे च वर्तन्ते । तदपि वेदपुराणयोः विषये द्विविधा धारा दृग्गोचरा भवति ।

द्विविधा धारा

वैदिकयुगे विचारविषयस्य धाराद्वयं वर्तते । एका वेदधारा अपरा च पुराणधारा । प्रथमा वेदधारा प्रारम्भतो धर्मयुक्ता तथाच यज्ञेषु विशिष्टदेवता उद्दिश्य हविर्त्यागविधेर्विरूपिका । अपरा द्वितीया धारा पुराणधारा लोके या घटना घटिता तामनुसृत्य समीक्ष्य च विपुलविवरणप्रतिपादिता ।

(घ) पुराणानां प्राचीनत्वम्

संस्कृतवाङ्मये भारतीयसस्कृतेः नैकानि मेरुदण्डानि सन्ति । तत्र वेदादारभ्य पुराणपर्यन्तमाधारभूतं मेरुदण्डं परिलक्ष्यते, यतोहि पुराणानि वेदानां उपबृंह्मणं वर्तते । वैदिकसंहितामन्त्रेषु विविधेषु स्थलेषु पुराणशब्दस्य प्रयोगः दरीदृश्यते । यस्योदाहरणानि आचार्ययास्केन दत्तानि –

त्रितं कूपेऽवहितमेतत् सूक्तं प्रतिबभौ ।
तत्र ब्रह्मेतिहास–मिश्रमृङ्मिश्रं गाथामिश्रं भवति ॥[२]

छान्दोग्योपनिषदि पुराणानामुल्लेखः प्राप्यते –

ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं
चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम् ॥[३]

---

[1] महाभारते १/२६७
[2] निरुक्ते ४/१/६
[3] छान्दोग्योपनिषदि ७/१/२

उपनिषत्स्वपि पुराणानां प्रयोगः दरीदृश्यते, वस्तुतस्तु अथर्ववेदे ब्राह्मणग्रन्थेष्वपि च पुराणशब्दस्य प्रयोगः भिन्नेष्वप्यर्थेषु प्रयुक्तो जातः । तदनन्तरं पुराणानां गणना आख्यानेतिहासरूपेणापि सञ्जाता –

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।[१]

ततः परं महाभारतादिग्रन्थेषु पुरातनेतिहासरूपेण पुराणानां नामानि स्वीकृतानि । ब्राह्मणग्रन्थेष्वपि पुराणानि आख्यानरूपेण परिगणितानि । शतपथब्राह्मणस्य भाष्ये सायणेनोक्तम् –

उर्वशी ह्यप्सराः पुरूरवसमैडं चकमे ।[२]

इत्यादीनि पुरातनपुरुषवृत्तान्तप्रतिपादकानि पुराणम् ।[३]

अनेनाध्ययनेन परिज्ञायते यत् वैदिकवाङ्मयादारभ्य कौटिल्यार्थशास्त्रपर्यन्तं पुराणानां प्रयोगः विविधेषु अर्थेषु वर्णनम् (आख्यानं, पुराणं, वृत्तं, इतिहासरूपेणापि) प्राप्यते । एतादृशी पुराणानामीयत्ता प्राचीनता च सिद्धयति । अथर्ववेदस्य मन्त्रेऽस्मिन् प्रतीयते यत् पुराणानामवस्थितिः वैदिककालेऽपि उपलभ्यते –

ऋचः सामानि छन्दांसि पुराणं यजुषा सह ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥[४]

विविधानां वैदिकवाङ्मयग्रन्थानामध्ययनेन ज्ञायते यत् वैदिकयुगे सहित्यस्य धाराद्वयं प्रकटितम् ।

१. विशुद्धधार्मिकीधारा

---

1 मत्स्यपुराणे ७२/६

2 शतपथ ब्राह्मणे ११/५/४/४

3 शतपथ ब्राह्मणे सायणभाष्य ११/५/६/८

4 अथर्ववेदे ११/४/२/४

२. विशुद्धलौकिकीधारा

प्रथमेहि (विशुद्धधार्मिकीधारा) देवानां स्तुतिः प्रार्थनादिकं मुख्यं लक्ष्यमासीत् । द्वितीये तु (विशुद्धलौकिकीधारा) प्रसिद्धानां महनीयजनानां लोकप्रसिद्धवृत्तादीनां वर्णनमभीष्टमासीत् । अत्र द्वितीयधारायां पुराणस्यावस्थितिः नितान्ता उपयुक्तास्ति । यस्योदाहरणम् अथर्ववेदे उपलभ्यते –

येत आसीद् भूमिः पूर्वा यामद्धा तय इद् विदुः
यो वै तां विद्यान्नामथा स मन्येत पुराणवित् ।[1]

तदवदेव ब्राह्मणग्रन्थेष्वारण्यकग्रन्थेषूपनिषत्सु च पुराणानां विविधस्थलेषूल्लेखः प्राप्यते । विविधानि उदाहरणानि एतादृशानि सन्ति । यथा ब्राह्मणग्रन्थेषु –

मद्ध्वाहुतयो ह वा ऽएता देवानाम् ।
यदनुशासनानि विद्या वाकोवाक्यमितिहासपुराणं
गाथा नाराशंस्यः । स य एवं विद्वान् अनुशासनानि विद्या
वाकोवाक्यमितिहासपुराणं गाथा नाराशंसीरित्यहरहः
स्वाध्यायमधीते ॥ मध्वाहुतिभिरेव तद्देवांस्तर्पयति ।[2]

तैत्तिरीयारण्यकग्रन्थे –

ब्रह्मयज्ञप्रकरणे यद् ब्राह्मणानीतिहासान्
पुराणानि कल्पान् गाथा नाराशंसीर्मेदाहुतयो
देवानामभवन् । ताभिः क्षुधं पाप्मानमपाघ्नन् ।

---

[1] अथर्ववेदे ११/१०/७/२

[2] शतपथ ब्राह्मणे ११/५/६/८

अपहत–पाप्मानो देवाः स्वर्गं लोकमानयन् ।

ब्रह्मणः सायुज्यमृषयोऽगच्छन् ॥[१]

छान्दोग्योपनिषदि

नाम वा ऋग्वेदो यजुर्वेदः सामवेद

आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदः ।[२]

अनेन प्रकारेण अनेकेषु स्थलेषु उदाहरणानि दृग्गोचरणानि सन्ति । वैदिकसाहित्यस्य अभिन्नग्रन्थरत्नानि सूत्रग्रन्थाश्च सन्ति ।

ततः स्मृतिग्रन्थेष्वपि पुराणानां वर्णनं महत्त्वं वैशिष्ट्यञ्च उपलभ्यते । महाभारते तु "पुराणं मानवो धर्मः" इत्यपि वर्णितः –

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।

आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥[३]

महाभारते विविधेषु पर्वसु महापुराणानां नैकेषु स्थलेषु उल्लेखः प्राप्तः । एतेन ज्ञायते यत् पुराणानां प्राचीनता अनेकैः प्रकारैः सिद्धिर्जाता, दार्शनिकपरम्परायामपि पुराणानां प्राचीनत्वं सिद्धयति । तत्रादिशङ्कराचार्यादारभ्य आचार्याणां भाष्येषु पुराणानां प्राचीनत्वं सिद्धयति । आदिशङ्कराचार्येण शारीरिकभाष्ये स्मृतेरुदाहरणं उद्धीयते यत् –

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।

आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥[४]

---

[1] तैत्तिरीयारण्यके २/९

[2] छान्दोग्योपनिषदि ७/१/२

[3] महाभारते अनुशासनपर्व २३२

[4] शारीरिकभाष्ये १/३/२८

स्मृतिग्रन्थेषु पुराणानि विद्यास्थानेष्वन्यतमानि वर्तन्ते । यस्योल्लेखः विविधस्मृतिग्रन्थेषु परिचीयन्ते । दार्शनिकविद्वान्सः यथा–शबरस्वामि–कुमारिलभट्टशङ्कराचार्यवात्स्यायनवैष्णवाचार्यैश्च पुराणानां प्रामाण्यं स्वीक्रियते । महाभाष्यकारमहर्षिपतञ्जलिनापि पुराणानामुल्लेखः कृतः । अलवरूनि–नामको अरबीग्रन्थकारः स्वग्रन्थे भारतविषयकग्रन्थे पुराणानां कथावस्तु स्वीकरोति स्म ।

अतः भारतीयसंस्कृतसाहित्यस्येतिहासे पुराणशब्दस्योदयः वैदिकयुगे बभूव । ततः परं पुराणानामभ्युदयः वैशिष्ट्यं महत्त्वं लोकप्रसिद्धश्च उत्तरोत्तरेण गतिशीला च सञ्जाता । पुराणविषये विविधेषु पुराणेषु यो उल्लेखः सम्प्राप्तः तत्तु अन्यतमः वर्तते । यथा मात्स्ये –

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसान्यायविद्याश्च प्रमाणाष्टकसंयुताः ॥[१]

स्कान्दे च लिखितम् –

पुराणमेकमेवासीदस्मिन् कल्पान्तरे नृप ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरं ॥[२]

पाद्मे च –

प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्तदा ।
कलिना गृहणं दृष्ट्वा पुराणस्य तदा विभुः ॥
व्यासरूपी तदा ब्रह्मा संग्रहार्थे युगे युगे ।

---

[1] मत्स्यपुराणे ३/३–४

[2] स्कन्द पु. रेवा माहात्म्य १/२३/३०

चतुर्लक्षप्रमाणेन द्वापरे द्वापरे विभुः ॥[1]

अनेन निष्प्रचमिति परिज्ञायते यत् पुराणानि लौकिकशास्त्राणि परिगणितानि, यानि वेदाद्भिन्नानि परञ्च तदनुकूलानि शास्त्राणि सन्ति । अनेन कारणेन तन्त्रवार्तिककारेण लिखितं यत् –

वेदः अकृत्रिमः पुराणं च कृत्रिमम्[2]

न्यायभाष्यकर्त्रा प्रसिद्धाचार्येण वात्स्यायनेन इतिहासपुराणयोः पुराणमेव स्वीकृतम् ।

लोकवृत्तमितिहासपुराणस्य विषयः ।[3]

पुराणानां प्राचीनताविषये यदा मीमांसते तदा निष्प्रचमेव परिज्ञायते यत् पुराणवाङ्मयं इतिहासोत्तमं तु अस्त्येव ।। वेदेषु नेति नेति शब्दस्याभिप्रायः पुराणेषु परिलक्ष्यते ।

(ङ) वेदपुराणयोः सम्बन्धः

वेदोत्तरकाले वेदानां महत्त्वं वैशिष्ट्यञ्च प्रतिपादनाय पुराणानामेवाविर्भावः जातः । यतोहि वेदपुराणयोः अनेकानि उदाहरणानि समानरूपेण प्राप्तानि भवन्ति ।

पुराणेषु अनेकेषु स्थलेषु वेदानां मन्त्राः सम्प्राप्ताः । इति कथन–परिपुष्टये श्रीजीवगोस्वामिपादेन पुराणशब्दस्यार्थः स्वकीये ग्रन्थे “भागवतसन्दर्भे” नूतनया दृष्ट्या पुराणशब्दस्य व्युत्पत्तिः कृता । “पूरणात् पुराणम्” अर्थात् यच्छास्त्रं वेदार्थं

---

[1] पद्मपुराणम् सृष्टिखण्डे अ. १

[2] तन्त्रवार्तिके १/३/३

[3] न्यायभाष्ये ४/१/६१

पूरयति तत् पुराणं निगद्यते । अनया व्युत्पत्याधारेण अवगन्तुं शक्यते यत् वेदपुराणयोः परस्परसम्बन्धोऽस्ति । यथा –

न चावेदेन वेदस्योपबृंहणं सम्भवति ।

नहि अपूर्णस्य कनकवलयस्य त्रपुणा पूरणं युज्यते ॥[1]

विषयोऽयन्तु सामान्यतया सर्वैः दृश्यते यद् येन यस्य पूर्तिः क्रियते अनयोः उभयोः समानता, अनन्यता सम्भवति । समानधर्मत्वेनैव पूर्तिः सञ्जायते अन्येन न । यदि सुवर्णस्यापूर्णकङ्कणस्य पूर्तिः कर्तुमिच्छति तर्हि नहि अन्यपदार्थेन लौहापित्तलादिभिः तत्पूरणं सम्भवति, सुवर्णलौहयोर्मध्ये न जातीयसम्बन्धोऽस्ति तथा साधर्म्यं सामञ्जस्यमपि नास्त्येव । अनेन प्रकारेण वेदपुराणयोः सम्बन्धोऽस्ति इत्थमेव । अत एव वेदार्थस्योपबृंहणं वेदवद्वस्तुना सम्भवति न वेदभिन्नेन वस्तुना । वेदसमानधर्मणा तु केवलं पुराणेनैव सम्भवति । अनया व्युत्पत्तिलभ्ययुक्त्याधारेण इदमेव सिद्धं जातं यत् पुराणैः वेदस्य उपबृंहणं कर्तुं शक्यते ।

पुराणस्याविर्भावः वेदानन्तरं ब्रह्मणः मुखाज्जातः । अत एव पुराणं वेदसमकक्षमिति पूर्वोक्तप्रमाणत्वेन सिद्धिर्भवति । स्कन्धपुराणस्य प्रभासखण्डेऽपि अस्य विषयस्य प्रतिपादनं प्राप्तम् –

पुरा तपश्चचचारोग्रममराणां पितामहः ।

आविर्भूतास्ततो वेदाः सषडङ्गपदक्रमाः ॥

---

[1] भागवतसन्दर्भे पृष्ठे १७

ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवम् ।

नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्ततम् ।

निर्गतं ब्रह्मणो वक्त्रात् ।[१]

अनेन प्रकारेण श्रीमद्भागवतेऽपि एतदेव प्रकारान्तरेणोल्लिखितमस्ति । यदा ब्रह्मणा चतुर्णां वेदानां समुत्पन्नानन्तरं पञ्चमवेदस्वरूपं स्वमुखेभ्यः पुराणमपि उत्पादितम् । तृतीयस्कन्धे वर्णनमिदं उपलभ्यते –

इतिहासपुराणानि पञ्चमं वेदमीश्वरः ।

सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥[२]

पुराणानां महत्त्वं वेदवत् प्रतिभाति । इतिहासपुराणाभ्यां वेदशब्दस्य प्रयोगः साक्षाद्रूपेण दृग्गोचरो भवति । केवलं पुराणैः पुराणेषु वेदरूपता न प्रकटयति अपितु वेदान् निःश्वासरूपेण अभिमन्यमानाः उपनिषद्भिरपि स्वीकृताः । ताभिरपि वेदवत् पुराणेतिहासानामपि ब्रह्मणा निःश्वासरूपिता कथिता –

एवं वा अरे अस्य महतो

भूतस्य निःश्वसित्मेतद् यद्

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाविङ्गिरस

इतिहासः पुराणं विद्या उपनिषदः ।

---

[1] स्कन्दपुराणे प्रभासखण्डे ६/२१–२२

[2] श्रीमद्भागवते ३/१२/३९

एभिर्प्रमाणैः अभिज्ञायते यत् वेदवदेव पुराणमपि समादरणीयं विद्यते । पुराणानां वैशिष्ट्यं महत्त्वं मधुरत्त्वञ्च जगति प्रसिद्धमिति । यतोहि पुराणेषु या भाषा प्रयुक्ता अस्ति सा भाषा सम्बादयोजना, शब्दयोजना चास्ति । सैव भाषा सरला काठिन्यरहिता सुबोधगम्या च वर्तते । तर्हि अत्र पुराणेषु कीदृशं कथानकं कीदृशी शैली चात्र विचार्यते ।

(च) पुराणानां भाषाशैली

यस्य कस्यापि ग्रन्थस्य ग्रन्थकारः स्वग्रन्थस्य प्रतिपाद्यविषयस्य यथार्थनिरूपणं शब्दैः भाषया च प्रयोगं करोति तस्य कर्तुः इदमेव उद्देश्यं भवति यत् स्वविचारान् भावाञ्च गेहे गेहे जने जने च कथं प्रसरेत् ? इति सञ्चिन्त्यैव ग्रन्थकर्ता सैव शैली च स्वीकरोति, यस्यां भाषायां जनैः सौकर्य्येण बोधोपजायते इत्यवलम्ब्य स्वभावान् अभिव्यनक्ति । परम्परेयं वेदोत्तरकाले प्रायेण सर्वेषु ग्रन्थेषु च प्राप्यते । यथोक्तं पूर्वमेव वेदादारभ्य पुराणपर्यन्तं इति वृत्तम् । अत्र पौराणिकभाषाशैली कथानकञ्च कीदृशं अस्ति? इति विचार्यते । पुराणानां विशिष्टं स्वरूपं कस्यापि वस्तोः वर्णनमात्रेण सिद्ध्यति । पुराणं न केवलमितिहासः अपि च अस्य देशस्य भारतीयसंस्कृतेः स्वरूपमपि स्पष्टं भवति । पुराणानां लक्ष्यमिदं वर्तते यज्जनानां चित्तेषु श्रवणेन पठनेन अध्ययनेन च धर्मं प्रति प्रवृत्तिः स्यादिति ।

अनेन कारणेन सर्वेषां महापुराणानां भाषा, सरला, सुबोधा, सहजा च सर्वत्रैव दरीदृश्यते ।

महापुराणेषु महर्षिव्यासेन चरितवर्णनव्याजेन वैदिकलौकिकोभयविधशब्दानां मिश्रणं क्रियते । शब्दानां समूहराशिः वाक्यं निर्मीयते । वाक्यानां समूहः एव

भाषारूपेण आविर्भवति । अत्र प्रथमे हि शब्दविमर्शः, वाक्यविमर्शः, पारिभाषिकशब्दविमर्शश्च यदा क्रियते तदा पुराणेषु सर्वे शब्दाः विभागद्वये विभक्ताः सन्ति इति प्रतीयते ।

प्रथमे – वैदिकशब्दाः, द्वितीये – लौकिकशब्दाश्च ।

प्रथमे क्रमे ये वैदिकशब्दाः भवन्ति ते लौकिकव्याकरणनियमैराबद्धाः न भवन्ति । पुराणेषु लौकिकशब्दाश्च ये सन्ति ते लौकिकघटनाधारेण सामान्यजनप्रयुक्ताधारेण भवन्ति । अनेन कारणेन लौकोक्तीनां सूक्तीनाञ्च उदाहरणानि पुराणेषु सम्प्राप्तानि भवन्ति ।

(२) महापुराणेषु भागवतम्

श्रीमद्भागवतस्यान्तरङ्गपरीक्षायाः प्राग् तद्बहिरङ्गपरीक्षायाः सम्प्रति नितान्तावश्यकी । श्रीमद्भागवतं महापुराणान्तर्गते उपपुराणान्तर्गते वा इति जनैः ग्रन्थस्योपरि सन्देहः क्रियते । यत्किञ्चिज्जनैः देवीभागवतं गौरवोऽयं प्रदानं कर्तुमिष्यते । परञ्च उपलब्धप्रमाणानुसारेण अनुशीलेन च श्रीमद्भागवतस्यैव महापुराणत्त्वं सिद्ध्यति ।

(क) महापुराणस्य परिभाषा –

महापुराणस्य परिभाषायाः विषये शब्दद्वयस्य महा + पुराणम् इत्यनयोः परिचयं भवेत् । प्रथमेहि महाशब्दस्य निष्पत्तिविषये अवबोधव्यम् । महत् शब्दस्य निष्पत्तिः मह् धातोः उपजायते । मह् पूजायाम्, मह्यते पूज्यतेऽसौ इति महत् "वर्तमानेपृषद्बृहन्महज्जगच्छतृवच्च"[1] इति औणादिकसूत्रेण अति निपात्यते महान्

[1] सिद्धान्तकौमुद्याम् उणादिप्रकरणम् २/८१

शब्दः निष्पद्यते । महच्चासौ पुराणमिति महापुराणम् । पुराणशब्दस्य व्युत्पत्तिः परिभाषा च पूर्वमेव निगदिता ।

पुराणमहापुराणयोर्मध्ये को भेदः? विषयेऽस्मिन्नत्र विचार्यते । पुराणकारैः पुराणानां पञ्चभेदाः कल्पिताः –

१. पुराणम् ।

२. महापुराणम् ।

३. उपपुराणम् ।

४. औपपुराणम् ।

५. इतिहासश्चेति ।

तत्र महाभारतं तु इतिहासलक्षणोपेतमपि कर्मोपासना ज्ञानात्मककाण्डत्रयरहस्यपूर्णत्वात् सर्वाङ्गपूर्णं पुराणमङ्गीक्रियते । पुराणानि न लौकिकेतिहासरूपाणि नापि कल्पितगाथापूर्णानि वस्तुतः पुराणानि ज्ञानमयस्य त्रिकालदर्शिनो वेदस्य भाष्यरूपाणि ।

पुराणस्य लक्षणानि पञ्चविधानि निगदितानि । किन्तु केवलं श्रीमद्भागवतमहापुराणमेव ग्रन्थोऽस्ति यस्य लक्षणं दशविधरूपेण सम्प्राप्यते । पुराणस्य पञ्चलक्षणं नैकेषु पुराणेषु सम्प्राप्यते । प्रशस्तं किञ्चिद् पाठभेदेन पुराणलक्षणमिदं दरीदृश्यते । यथा –

मत्स्यपुराणे ५३/६४

मार्कण्डेयपुराणे १३७/१३

देवीभागवते १/२/१८

शिवपुराणस्य वायवीयसंहितायां पूर्वार्द्धे १/४१

अग्निपुराणे १/४१

भविष्यपुराणे २/२५

ब्रह्मवैवर्तपुराणे १३१/६

कूर्मपुराणस्य पूर्वार्द्धे १/१२

वाराहपुराणे २/४

गरुडपुराणस्य चारकाण्डे २/२८

ब्रह्माण्डपुराणस्य पूर्वभागे १/३८

अमरसिंहप्रभृतिभिः कोशकारैरपि पुराणलक्षणमिदं यथैवाङ्गीकृतम् ।

अनेन प्रमाणेन इदं ज्ञायते यत् श्रीमद्भागवतमहापुराणस्य गणना महापुराणेषु भवति न तु पुराणेषु । अस्य ग्रन्थस्य महापुराणत्वमनेकैः प्रमाणैः सिद्ध्यति ।

(ख) श्रीमद्भागवतस्य महापुराणत्वम्

श्रीमद्भागवतं सर्वेषां पुराणानां मूर्धन्यमानं पुराणं नास्त्यत्र सन्देहलवलेशः । यतोहि पुराणमिदं साक्षात्कृष्णस्यैव विग्रहमेव ।

सर्वेषां च पुराणानां श्रेष्ठं भागवतं स्मृतम् ।[1]

इति भविष्यपुराणोक्त्याधारेण अस्य भागवतपुराणस्य श्रेष्ठत्वप्रतिपादनात् तत्र श्रद्धालवः वैष्णवाविपश्चितो भागवतपदेन श्रीमद्भागवतं महापुराणं मन्यते । उद्धवसम्प्रार्थितः सन् भगवान् श्रीकृष्णः स्वयमेव भागवते प्रविवेश, अतः “तेनेयं वाङ्मयीमूर्तिः प्रत्यक्षा वर्तते हरेः” इत्यादिना पद्मपुराणे भागवतमाहात्म्ये श्रीकृष्णस्यैव

[1] भविष्यपुराणे ३/३/२८/१५

स्वरूपभूतं शास्त्रमिति निरूपितम् । श्रीमद्भागवतं भक्तिज्ञानविरागाणां त्रिवेणी पवित्रतमा वर्तते । भारतीयास्तिकजनानां हृदयपटलेषु न केवलं सर्वश्रेष्ठपुराणरूपे अपितु भगवतः कृष्णस्य विग्रहरूपे अस्मिन् पुराणे जनानामास्था वर्तते ।

महर्षिणा वेदव्यासेन महाभारतम् अष्टादशमहापुराणानि च रचितानि । महाभारतं प्रसिद्धमेव तच्च एकलक्षश्लोकात्मकं वर्तते । प्रायः सर्वेषु पुराणेषु पुराणानां नामोल्लेखः समुपलब्धः किन्तु क्रमः भिन्नः भिन्नः वर्तते । विष्णुपुराणस्य तृतीयेंऽशे पुराणानां नामक्रमश्चैव प्रतिपादितोऽस्ति । तथाहि –

ब्राह्मं पद्मं वैष्णवं च शैवं भागवतं तथा ।
तथान्यं नारदीयं च मार्कण्डेय च सप्तमम् ॥
आग्नेयमष्टमं चैव भविष्यं नवमं तथा ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ॥
वाराहं द्वादशं चैव स्कान्दं चात्र त्रयोदशम् ।
चतुर्दशं वामनकं कौर्मं पञ्चदशं तथा ॥
मात्स्यं च गारुडं चैव पञ्चदशं तथा ।
महापुराणान्येतानि ह्यष्टादशमहामुने ॥[1]

श्रीमद्भागवतेऽपि अष्टादश पुराणानां नाम वर्णनं समुपलब्धम् । अपिच सर्वेषां पुराणानां श्लोकसंख्यापि ग्रन्थेऽस्मिन् सम्प्राप्ता ।

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
भविष्यं नारदीयञ्च स्कान्दं लिङ्गं वराहकम् ॥
मार्कण्डेयमथाग्नेयं ब्रह्मवैवर्तमेव च ।

[1] विष्णुपुराणे ३/६/२१–२४

कौर्मं मात्स्यं गारुडञ्च वायवीयमनन्तरम् ॥

अष्टादशसमुपदिष्टं ब्रह्माण्डमिति संज्ञितम् ।[1]

अपिच देवीभागवतस्य प्रथमे स्कन्धे द्वितीयाध्याये तृतीयश्लोके आद्यक्षरक्रमेणाष्टादश पुराणानां नामानि प्रोक्तानि सन्ति ।

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।

अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥[2]

एवं विभिन्नेषु पुराणेषु महापुराणगणनायामेकस्य भागवतपुराणस्य नाम निर्दिष्टमस्ति । पूर्वोक्तेषु पुराणसंग्राहकवाक्येषु पुराणानां संज्ञामयोर्भेदः उपलभ्यते । तत्र देवीभागवते "वचतुष्टयम्" इत्यनेन गृहीतस्य वायुपुराणस्य गणना भागवते न विद्यते । एवं श्रीमद्भागवते "शैवं लैङ्गं सगारुडम्" इति श्लोकेन गृहीतस्य शिवपुराणस्य देवीभागवते न ग्रहणं कृतमिति । अत एव अनयोः ग्रन्थयोः क्रमवैषम्यं दरीदृश्यते अयमेव सुस्पष्टं भवति । ननु तर्हि वायुपुराणं वा शिवपुराणं वा महापुराणम् इति चेद् अत्रोच्यते – देवीभागवतवचनं प्रमाणत्वेन स्वीकुर्वतां वायुपुराणं महापुराणम् एतदतिरिक्तपुराणवचनस्य प्रमाणत्वं स्वीकुर्वतां शिवपुराणमेव महापुराणमिति सर्वं समञ्जसम् । इदमेव निश्चयं जातं यत्पुराणानां संख्याष्टादश अक्षुण्णा एव ।

सर्वत्र अष्टादशमहापुराणसंग्रहवाक्येषु भागवतपदस्यैव उपलभ्यमानत्वात् तेन भागवतपदघटितयोर्देवीभागवतश्रीमद्भागवतयोर्मध्ये महापुराणत्वेन कस्य ग्रहणमिति चेत् –

---

[1] श्रीमद्भागवते १२/०७/२३–२४

[2] देवीभागवते १/२/३

अष्टादशपुराणेषु पुराणस्यानुक्रमणिकायामपि भागवतं इत्यस्य नामकस्य ग्रन्थद्वयं वर्तते । प्रथमः – विष्णुमहिमायाः प्रतिपादकं श्रीमद्भागवतम् । द्वितीयस्तु देवीभागवतं अयं ग्रन्थः देव्याः गौरवस्य प्रतिपादकः अस्ति । अत्र विचारणीयोऽयं विषयः वर्तते यत् द्वयोर्मध्ये कस्य ग्रहणं कर्तव्यं देवीभागवतं श्रीमद्भागवतं वा । अस्य विषयस्य समाधानाय कतिपयानि प्रमाणानि उपस्थापितानि ।

पद्मपुराणानुसारेण पुराणानां गणना सात्विकादिरूपेणापि क्रियते । सात्विकपुराणेषु श्रीमद्भागवतस्य अपि नामासीत् –

वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।

गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥

सात्विकानि पुराणानि विज्ञेयानि शुभानि च ।[१]

गरुडपुराणमपि सात्विकपुराणानां विभाजनं त्रिधारूपेण कृतमिति– सात्विकोत्तमं, सात्विकमध्यमं, सात्विकाधमपुराणमिति । मत्स्यकूर्मौ सात्विकाधमौ स्तः, वायुः सात्विकमध्यमोऽस्ति, गरुडविष्णुभागवतपुराणानि सात्विकोत्तमानि पुराणानि निगदितानि –

सत्वाधमे मात्स्यकौर्मे समाहुर्वायुं

चाहुः सात्विकं मध्यमं च ।

विष्णोः पुराणं भागवतं पुराणं

सत्वोत्तमे गारुड चाहुरार्याः ॥[२]

---

[1] पद्मपुराणे उ. ख. २३६/१८

[2] गरुडपुराणे

सात्विकादिभेदः कथं क्रियते ? गरुडपुराणे सात्विकादीनां भेदानां निरूपणं विषयविवेचनस्याधारेण क्रियते । यथा– पुराणेषु विष्णोः माहात्म्यवर्णनं प्रमुखत्वेन प्रतिपाद्यते तदेव पुराणं सात्विकमस्ति –

अन्यानि विष्णोः प्रतिपादकानि ।

सर्वाणि तानि सात्विकानीति चाहुः ॥[1]

सर्वेषु पुराणेषु श्रीमद्भागवते एव ग्रन्थः वर्तते यस्य सर्वेषु स्कन्धेषु विष्णोः चरितं विस्तृतरूपेण लभ्यते । परञ्च देवीभागवते हरेः वर्णनं नैव विद्यते अपितु देवीविषयकवर्णनं वर्तते । अनेन प्रमाणेन सिद्धं जायते यत् श्रीमद्भागवतमेव महापुराणमस्ति न तु देवीभागवतम् ।

अनयोः पुराणयोः रचनाकालविषये यदि विचारं क्रियते, तर्हि स्कन्धपुराणे वर्णनं विद्यते यत् अष्टादशपुराणानां रचना पश्चाद् महाभारतस्य रचना कृतासीत् –

अष्टादशपुराणानि कृत्वा सत्यवतीसुतः ।

भारताख्यानमखिलं चक्रे तदूपबृंहितम् ॥[2]

अनेन श्लोकाधारेण भागवतस्य रचना महाभारतस्य पश्चाद्भूत् इति भागवते वर्णनमस्ति तर्हि भागवतं व्यासरचितं सदपि कथं महापुराणम् । मत्स्यपुराणे प्रसङ्गेऽस्मिन् वर्णनं सम्प्राप्यते व्यासेन शतपर्वयुतं महाभारतं विरचितम् । वेदव्यासेन स्वशिष्यौ जैमिनिवैशम्पायनौ आहूय आदिष्टौ इदं संक्षेपी कुरु ।

अनेन सिध्यते यत् शतपर्वात्मकमहाभारतस्य रचनापश्चाद् सप्तदशपुराणानां रचनां कृत्वापि वेदव्यासस्य मनसि संतोषो नैव लब्धः । तदा नारदोपदिष्टेन व्यासः

---

[1] गरुडपुराणे

[2] स्कन्धपुराणे

श्रीमद्भागवतस्य रचना कृतासीत् । तदनन्तरं शान्तिमवाप इति भागवते वर्णनं सम्प्राप्यते ।

अत एव अष्टादशमहापुराणेषु गण्यते अतः भागवते दोषो न विद्यते । भगवता प्रोक्तं इदं भागवतम् अनेन व्युत्पत्याधारेणापि इदमेव गणना अष्टादशपुराणेषु विद्यते । अन्यैरपि सर्वैः पुराणैः पञ्चलक्षणसमन्वितम् । श्रीमद्भागवतमेव पुराणमस्ति यत्र दशलक्षणानामुल्लेखः समुपलभ्यते । किन्तु देवीभागवतं नैव दशलक्षणसमन्वितमस्ति । वामनपुराणानुसारेण गायत्र्याः समारम्भः, वृत्रस्य वधस्य प्रसङ्गः ह्यग्रीवस्य वर्णनं यस्मिन् ग्रन्थे वर्णिते तदेव भागवतमिष्यते –

ह्यग्रीव–ब्रह्मविद्या यत्र वृत्रवधस्तथा ।
गायत्र्याः च समारम्भस्तद् वै भागवतं विदुः ॥[१]

समग्ररूपेण लक्षणमिदं श्रीमद्भागवतस्य मङ्गलाचरणे संघटते ।

(३) श्रीमद्भागवतस्य वर्ण्यविषयाः

(क) श्रीमद्भागवतस्य परिचयः

विभिन्नपुराणेषु यद्यपि यानि पुराणनामानि सङ्कीर्तितानि तन्मध्ये भागवतपुराणं विहाय कस्मिन्नपि नामपूर्वे श्रीमच्छब्दस्य प्रयोगः नैव दृष्टः । श्रीमद्भागवतस्य महत्त्वं चातुर्विधपुरुषार्थप्राप्तिनिमित्तं च स्वरूपं स्वीकृतम् । अनेन कारणेन टीकाकारैः श्रीमच्छब्दविषये को हेतुः इति उद्धृतः । भावार्थदीपिकाप्रकाशे वंशीधराचार्येण निगदितं यत् –

"श्रीमद्भागवते ऋचः सामानि यजूंसि सा हि श्रीरमृता सताम्"

इति श्रुतेर्वेदाभ्यास एव श्रीः सा विद्यतेऽस्यास्मिन्वेति श्रीमान्

[1] वामनपुराणे

"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव
षण्णां भग इतीर्यते" ॥ इति स्मृतेर्भगः षड्विधमैश्वर्यं सोऽस्यास्तीति
भगवान् कृष्णस्तं भगवंतमुपास्त इति भागवतः । अत्र कारणादण्
श्रीमांश्चासौ भागवतश्चेति श्रीमद्भागवतस्तस्मिंस्तथा ।[१]

अनेन प्रमाणेन इदं स्पष्टं भवति श्रुतेरभ्यासः एव श्रीशब्दवाच्यं अवगम्यते । विद्यतेऽस्मिन् श्रीः सैव श्रीमान् इति ।

भागवतशब्दस्य निर्वचनम् अनेकैः विद्वद्भिः स्व–स्वमतानुसारेण प्रस्थापितम् । "भगवत इदं भागवतम्"इति भगवच्छब्दात् भावार्थे "अण्" प्रत्यये कृते सति भागवतशब्दः निष्पद्यते । श्रीमद्भागवतेऽपि अनेकेषु स्थलेषु भागवतमित्युच्यते । भागवतपदं संज्ञाविशेषणयोः द्वयोरर्थयोः प्रत्युक्तौ जातौ । आत्मलाभार्थाय भगवत्प्रोक्तं यदुपायाः स्युः तान् भागवतधर्मेति कथ्यते ।

भगवच्छब्दात् "तस्येदं" यस्य या देवता' अथवा अपत्याद्यर्थेऽपि 'अण्' स्वीकृत्यानया प्रकृतिप्रत्ययपद्धत्या "भागवत" इति पदेन भगवदंशजातं जीवमपि स्वीकर्तुं शक्नुमः । यथा भगवद्गीतायाम् –

ममैवांशो जीवलोके जीवभूतः सनातनः ।[२]

स्वामिश्रीमदखण्डानन्दसरस्वतीप्रभृतयो भागवततत्वज्ञा भागवतम्" इति शब्देन भगवत्प्रोक्तमपि गृह्णन्ति । अत एव श्रीमद्भगवता स्वांशभूतस्य जीवस्याज्ञानानिद्राभङ्गाय तस्मै स्वतत्त्वभूतं यज्ज्ञानमुपदिश्यते तदेव भागवतमिति सिद्धम् ।

---

[1] विविधटीकोपेत श्रीमद् भा. म. पु. पृ. संख्या ७४

[2] गीता १५/७

श्रीमद्भागतस्य परम्परा भगवतः नारायणतः प्रारभ्य परीक्षितपर्यन्तं प्राचलत । चतुःश्लोकीरूपज्ञानमयस्य श्रीमद्भागवतस्येयं परम्परा श्रीमद्भागवते एव प्राप्यते । प्राग्समये अस्य श्रीमद्भागवतस्य ज्ञानं भगवतानारायणेन कमलासनाय श्रीब्रह्मणे प्रदत्तमिति । तदनन्तरं ब्रह्मणा तेनैव देवर्षिनारदाय उपदिष्टम् । तन्नारदेन कृष्णद्वैपायनव्यासाय उपदिष्टम् । ततः परं व्यासभगवता श्रीशुकदेवाय प्रदत्तम् । शुकस्वरूपेण परीक्षिते समुपदिष्टमिति । अत एव भागवतमिदं भगवतोपदिष्टमिति कथ्यते । भागवते इयं परम्परा –

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा,
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतः,
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥[1]

श्रीमन्महाप्रभुवल्लभाचार्येण महाभागेन मतानुसारेण श्रीमद्भागवते शास्त्रार्थ–स्कन्धार्थ–प्रकरणार्थ–अध्यायार्थ–श्लोकार्थ–शब्दार्थ–अक्षरार्थाश्च सप्त प्रकारकाः अर्थाः कृताः सन्ति –

शास्त्रे स्कन्धे प्रकरणेऽध्याये वाक्ये पदेऽक्षरे,
एकार्थं सप्तधाजानन्नविरोधेन मुच्यते ॥

अन्यैरपि भागवततत्त्वविद्भिः भागवतस्य विषये लौकिकपारलौकिकार्थः स्वटीकाग्रन्थेषु निगदितः । इयमेव परम्परा भागवताध्यायिभिः मुक्तकण्ठेन स्वीकृता ।

---

[1] श्रीमद्भागवते १२/१३/१९

(ख) श्रीमद्भागवतस्य स्वरूपम्

श्रीमद्भागवतं संस्कृतसाहित्यस्यैकमनुपमरत्नमस्ति । सर्वेषु पुराणेषु श्रीमद्भागवतस्य उपयोगिता महत्त्वं च सर्वोत्कृष्टं विद्यते । अद्यत्वे श्रीमद्भागवतस्य यत्स्वरूपमेव उपलभ्यमानं सर्वोपकारकं वास्तविकं स्वरूपमवगन्तुम् एकमेव सरलं श्रीमद्भागवतं साधनमस्ति नास्त्यत्र शंकाकलंकावकाशः । श्रीमद्भागवतं हि धार्मिकाध्यात्मिकवाङ्मये एकं समुज्ज्वलं ग्रन्थरत्नमस्ति । श्रीमद्भागवतोपरि अनेकाभिः टीकाभिः इदं सम्पूर्णतया सिद्धयति । अन्यैः प्रमाणैरपि एतत् सिद्धयति । श्रीनारदीयपुराणे श्रीमद्भागवतस्यानुक्रमणिका प्राप्यते, तस्यामनुक्रमणिकायां प्रतिस्कन्धे यासां कथानां यादृशो निर्देशः समुपलभ्यते तासामेव कथानां भागवते तथैवप्रकारेण वर्णनं सम्प्राप्यते ।

नारदोक्तानुक्रमणिकायाम् –

मरीचे ! शृणु वक्ष्यामि वेदव्यासेन यत्कृतम् ।
श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् ॥
तदष्टादशसाहस्त्रं कीर्तितं पापनाशनम् ।
सुरपादपरूपोऽयं स्कन्धैर्द्वादशभिर्युतः ॥
भगवानेव विप्रेन्द्र! विश्वरूपी समीरोतः ।
तत्र तु प्रथमे स्कन्धे सूतर्षीणां समागमः ।
व्यासस्य चरितं पुण्यं पाण्ड्वानां तथैव च ।
परीच्छुकसंवादे सृष्टिद्वयनिरूपणम् ॥
ब्रह्मनारदसंवादेऽवतारचरितामृतम् ।

पुराणलक्षणं चैव सृष्टिकारणसम्भवः ॥

द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता ।

चरितं विदुरस्याथ मैत्रेयेणस्य सङ्गमः ॥

सृष्टिप्रकरणं पश्चाद् ब्रह्मणः परमात्मनः ।

कापिलं सांख्यमप्यत्र तृतीयोऽयमुदाहृतः ॥

सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः ।

पृथोः पुण्यतमाख्यानं ततः प्राचीन वर्हिषः ॥

इत्येष तुर्यो गदिते विसर्गे स्कन्ध उत्तमः ।

प्रियव्रतस्य चरितं तद्वंश्यानां च पुण्यदम् ॥

ब्रह्माण्डान्तर्गतानां च लोकानां वर्णनं ततः ।

नरकस्थितिरित्येष संस्थाने पञ्चमो मतः ॥

अलाभिलस्य चरितं दक्षसृष्टिनिरूपणम् ।

वृत्राख्यानं ततः पश्चानमरुतां जन्म पुण्यदम् ॥

षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे ।

प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम् ॥

सप्तमो गदितो वत्स ! वासनाकर्मकीर्तने ।

गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् ॥

समुद्रमन्थनं चैव बलिवैभवबन्धनम् ।

मत्स्यावतारचरितमष्टमोऽयं प्रकीर्तितः ॥

सूर्यवंशसमाख्यानं सोमवंशनिरूपणम् ।

वंशानुचरिते प्रोक्तो नवमोऽयं महामते ॥

कृष्णस्य बालचरितं कौमारं च व्रजस्थितिः ॥

भूभारहरणं चात्र निरोधे दशमः स्मृतः ।

नारदेन तु संवादो वसुदेवस्य कीर्तितः ॥

यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्ध्वस्य च ।

यादवानां मिथोन्तश्च मुक्तवेकादशः स्मृतः ॥

भविष्यकलिनिर्देशो मोक्षो राज्ञः परीक्षितः ।

वेदशाखा प्रणयनं मार्कण्डेयतपः स्मृतम् ॥

सौरीविभूतिरुदिता सात्वती च ततः परम् ।

पुराणसंख्याकथनमाश्रये द्वादशो ह्यम् ॥

इत्येव कथितं वत्स ! श्रीमद्भागवतं तव ।[१]

नारदोक्तविवेचने ज्ञायते यत् भागवतस्य स्वरूपविषये महर्षिणा स्वरूपलक्षणं तटस्थलक्षणञ्चेति साङ्केतिकरूपेण निर्दिष्टम् । वस्तुतः यस्य कस्यापि ग्रन्थस्य पुराणस्य परिचयः तद्गतवर्णितविषयाणामुद्देश्यं प्रयोजनं च साक्षाद्रूपेण यदि प्राप्यते तदेव तस्य परिचयो भवति ।

(ग) श्रीमद्भागवतस्य लक्षणदृष्ट्या वैशिष्ट्यम्

भारतीया संस्कृतिर्हि वेदस्मृतीतिहासपुराणानामनुसृत्यादितोऽद्यावधि प्रचलति । अस्मिन् संसारे सर्वे मानवाः दुःखनिवारणाय अनवरतरूपेण प्रयतन्ते ।

[1] नारदीयपुराणे नारदोक्तानुक्रमणिकायाम्

पश्पशाह्निके महाभाष्ये भगवता महर्षिणा पतञ्जलिनोक्तं यत् ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च[१] इति उक्त्याधारेण महर्षिणा वेदाध्ययने एव बलं प्रदत्तमिति । वेदानन्तरं पुराणानां महत्त्वं सर्वविदितमस्ति । पुराणसाहित्यस्यावश्यकता भारतीयानां मानवानां, सामाजिकीं सांस्कृतिकीं जीवनधारां च सम्यगवगन्तुं वर्तते ।

भारतेऽस्मिन् विदेष्वपि च पुराणानां स्थानं सर्वोत्कृष्टं प्रतिभाति । पुराणानां धार्मिकदृष्ट्याऽधिकं महत्त्वं विद्यते । वेदविहितानां धर्माणां सरलसुबोधभावगम्यया भाषया भगवता व्यासेन पुराणेषु विशदं वर्णनं कृतम् । वेदानां भाषातिदुरोढा तेषामर्था विषयाश्च सहसा लोकानां बुद्धौ नाधिरोढुं प्रवृत्ता । अतो वेदोक्तार्थस्य सम्यग् ज्ञानाय पुराणानि विरचितानि । अत एवोक्तं महाभारतस्यादिपर्वणि –

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
विभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥[२]

वेदे सूक्ष्मरूपेण यन्निर्दिष्टमस्ति तस्यैव विस्तृता व्याख्या व्यासदेवेन विस्तृतरूपेण महाभारते पुराणेषु च कृतास्ति । मत्स्यपुराणे निगदितं यत् –

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥[३]

अत एव पुराणान्यपि वेदवत् अपौरुषेयाणि नित्यानि सन्ति श्लोकस्यास्यायं भावः । पुराणेष्वपि श्रेष्ठतमं लब्धयशः श्रीमद्भागवतं पुराणमिति सर्वसम्मतं नास्त्यत्र शङ्काकलङ्कावकासः ।

---

[1] व्याकरणमहाभाष्ये

[2] महाभारत १/२६७

[3] मत्स्यपुराणे ५३\३

संस्कृतसाहित्यस्यामूल्यरत्नं श्रीमद्भागवतं महापुराणमस्ति । निगमकल्पतरोः अमृतमयं स्वयंगलितं फलमिदं श्रीमद्भागवतमस्ति ।

यथोक्तम् –

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥[१]

श्रीमद्भागवतं हि कल्पवृक्षवत् सकलानभीष्टान् पूरयितुं समर्थमस्ति । वाल्मीकिरामायणं महाभारतं श्रीमद्भागवतमित्यादयः ग्रन्थाः ज्ञानविज्ञानयोः अक्षयनिधिरस्ति यत् समग्रभारतीयबाङ्मयम् एभ्यः ग्रन्थेभ्यः प्रभावितोऽस्ति । रामायणमहाभारतयोः नैकाख्यानानां वर्णनं प्राप्यते तथा श्रीमद्भागवते भावात्मकानां सम्बन्धानां भक्तिप्रधानानां सम्बन्धानां लोकनीतेः राजनीतेः प्रेमक्रीडादिवर्णनं समुपलभ्यते ।

वंशीधराचार्येणोद्घोष्यते यत् यथा तीर्थक्षेत्रेषु काशी श्रेष्ठा स्यात् सर्वोत्तमा महनीया स्यात् तथैव सर्वेषु पुराणेषु श्रीमद्भागवतमस्ति –

क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ।
तथा पुराणव्रतानां श्रीमद्भागवतं द्विजाः ॥[२]

पुराणलक्षणविषये यदि चर्चा क्रियते तर्हि सर्वाणि पुराणानि पञ्चलक्षणसमन्वितानि सन्ति किन्तु श्रीमद्भागवतं दशलक्षणसमन्वितमस्ति ।

विष्णुपुराणेऽपि निगद्यते–

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव भवतो गदितं मया ॥[१]

---

[1] श्रीमद्भागवते १/१/३

[2] भावार्थदीपिकाप्रकाश टीका १/१/१

किन्तु श्रीमद्भागवतस्य द्वितीयस्कन्धानुसारेण निम्नलिखितानि दशलक्षणानि प्रतिपादितानि । यथा –

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।

मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥[2]

एतेषां लक्षणानां सम्यक्तया वर्णनमत्र क्रमशः प्रतिपाद्यते –

सर्गः– सृष्टेराम्भोद्भवश्च विषये दार्शनिकानां मतैक्यं न विद्यन्ते । सृष्टिक्रमे वादत्रयं प्रचलितमस्ति,

१. आरम्भवादः

२. परिणामवादः

३. विवर्तवादश्च ।

आरम्भवादः – सृष्टेः प्रारम्भे परमात्मनः निमित्तरूपेण परमाण्वादिभिः संयोगेन सृष्टेरुत्पत्तिर्जातायमेवारम्भवादः ।

परिणामवादः – सांख्यदर्शनानुसारेण प्रकृतिरेव सृष्टेः मूलकारणमस्त्येवायं परिणामवादः –

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतद् समुदयाच्च ।

परिणामतः सलिलवत्प्रतिगुणाश्रयविषेणात् ॥[3]

विवर्तवादः – शङ्कराचार्यस्य मतमिदं वर्तते, अस्मिन् वादे असत्वादपि भ्रमवशाद् दृश्यमत् दृश्यं परिवर्तनशीलमस्ति ।

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।

---

1 विष्णुपुराणसमीक्षितावृत्ति ६/८/२

2 श्रीमद्भागवते २/१०/१

3 सांख्यकारिकायाम् कारिका १६

अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः ॥[१]

शाङ्करमते विवर्तोऽयमेव माया तस्याः अपरनाम भ्रमोऽस्ति । श्रीमद्भागवते सृष्टेः वर्णनं विविधप्रकारैः प्रतिपाद्यते । सर्गस्य लक्षणं द्वितीयस्कन्धे निगदितं यत्–

भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।[२]

द्वादशस्कन्धेऽपि –

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ।

भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते ॥[३]

परब्रह्मणः सकाशाज्जाताद् गुणवैषम्यात् तन्नामकान् महत्तत्त्वादिरुत्पत्तिरजायत स सर्गरिति कथ्यते ।

विसर्गः – विसर्गस्यार्थः विशिष्टसृष्टिरस्ति । भगवदानुग्रहेण ब्रह्मा सृष्टिसामर्थ्यं प्राप्य जीवानां पूर्वजन्मकृतकर्मानुसारेण वासनाप्राधान्येन च चराचरजीवानां विशिष्टसृष्टिं रचयति ।

पुरुषानुगृहीतानामेतेषां वासनामयः ।

विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम् ॥[४]

ब्रह्मणः सृष्टीयं मानसी नैव बीजरूपेण । यतोहि बीजाद् बीजं चराचरमिति ।

स्थानम् – श्रीमद्भागवते स्थानशब्दं स्थितिरिति कथ्यते । सृष्टेः विशिष्टसृष्टेरनन्तरं स्थानविषये चर्चात्र जाता । भूगोल–खगोलाद्यवान्तरविद्या वैकुण्ठापरनामधेयस्य भगवतः विजयरूपेण वर्णिताः सन्ति ।

स्थितिर्वैकुण्ठविजयः[१]

---

[1] वेदान्तसारे पृष्ठे ६०

[2] श्रीमद्भागवते २/१०/३

[3] श्रीमद्भागवते १२/७/११

[4] श्रीमद्भागवते १२/७/१२.

लोकानां संख्या कति? तेषां लोकानां कति विस्तारः? कोऽस्ति नियामकः? इत्यादीनां प्रश्नानां समाधानं भवति ।

पोषणम् – प्रत्येकजीवानामुपरि भगवतः कृपा अबाधरूपेण समानरूपेण प्रवर्षति । परमात्मनः अनुग्रहैव पोषणमस्ति ।

पोषणं तदनुग्रहः[२]

यया विना जगदिदं क्षणमपि स्थातुं न शक्नोति । सृष्टिसंवर्धिनी पुष्टिविद्या इति । भगवतः श्रीकृष्णस्य चरणकमलमकरन्दयोः सकृदेवापि यदि रसं पातुं शक्यते तर्हि नैकजन्मार्जितपापानां प्रायश्चित्तमजायत ।

सकृन्मनः कृष्णपदारविन्दयो–
निर्वेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान्
स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥[३]

ऊतिः– ऊतिशब्दस्यार्थः कर्मवासना – ऊतयः कर्मवासना[४] । स्वकर्मोत्पन्नवासनासु बद्धो जीवः परमात्मानं विस्मरति । यावद् कर्मवासनया निर्बद्धो नैव जातः तावद् भगवद्प्राप्तिर्नैव भवितुं शक्यते । विविधवासनाकारणैः जीवानां असकृज्जन्म अभवन् । बद्धजीवानां वासनाप्रतिपादिका कर्मविद्या एव विद्यते ।

---

[1] श्रीमद्भागवते २/१०/४
[2] श्रीमद्भागवते २/१०/४
[३] श्रीमद्भागवते ६/१/१९
[4] श्रीमद्भागवते २/१०/४

मन्वन्तरम्– मन्वन्तरशब्दः सृष्टेः कालपरिमाणमस्ति । "मन्वन्तराणि सद्धर्म"[१] मन्वन्तराणामधिपतयः मानवैः सद्धर्मस्य पालनं कारयन्ति भक्तिप्रजापालनञ्च सद्धर्मस्यानुष्ठानं स्वयमेवाचरन्ति तं मन्वन्तरं प्रचक्षते । एकसप्ततिर्चतुर्युगानां मन्वन्तरमेकं भवति अपिच चतुर्दशमन्वन्तराणां कल्पैकः ।

युगानां सप्ततिः सैका मन्वन्तरमिहोद्यते ।

कृताब्दसङ्ख्यस्तस्यान्ते सन्धिः प्रोक्तो जलप्लवः ॥[२]

युगानां महायुगानां सैका सप्ततिरिह मन्वन्तरमुच्यते । सैकसप्ततिमहायुगेरन्यो मनुर्भवतीत्यर्थः ।

सन्धयस्ते मनवः कल्पे ज्ञेयश्चतुर्दश ।

कृतप्रमाणः कल्पादौ सन्धिः पञ्चदश स्मृतः ॥[३]

ईशानुकथा – हरिः भक्तश्च अनयोः विविधाख्यानानां वर्णनं भवति सैवेशानुकथेति कथ्यते तत्रैव भगवदवताराणामपि वर्णनं जातम् ।

अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ।

सतामीशकथाः प्रोक्ता नानाख्यनोपबृंहिताः ॥[४]

अवतारस्यानेकभेदास्सन्ति यथा – पूर्णावतार – अंशावतार – कलावतार – गुणावतार – इत्यादयः सन्ति । भगवतः कृष्णस्य पूर्णोवतारः –

एते चांश कलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।[५]

विशिष्टरूपेण नवमस्कन्धे भगवतः भक्तानाञ्च कथानकवर्णनं प्राप्यते ।

---

1 श्रीमद्भागवते २/१०/४

2 सूर्यसिद्धान्ते १/१८

3 सूर्यसिद्धान्ते १/१९

4 श्रीमद्भागवते २/१०/५

5 श्रीमद्भागवते १/३/२८

निरोधः – यदा भगवतः योगनिद्रां स्वीकृत्य शयनं करोति तदास्य जीवस्य शक्तिभिरुपाधिभिः सह शयनमिति निरोधः पश्चात् महाप्रलये जीवानां परमेश्वरे लयो जातः ।

निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः[१]

मुक्तिः – अज्ञानाच्छादितकर्तृत्वभोक्तृत्वादि – समन्वितभावान् हित्वा केवल–चिदानन्दाद्यात्मकेन स्वरूपेणावस्थितिरेव मुक्तिः –

मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः ।[२]

ब्रह्मज्ञानेन भगवद्प्रेम्णा चोभयप्रकारेण मुक्तिं प्राप्तुं शक्यते । श्रीमद्भागवते मुक्तिः पञ्चधा भवति –

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥[३]

आश्रयः – सकलचराचरजगतरुत्पत्तिः प्रलयञ्च येन तत्त्वेन प्रभावितोऽस्ति तद्परब्रह्मैव आश्रयः ।

श्रीमद्भागवतं वेदरूपिणः कल्पवृक्षस्य परमानन्दप्रदं रसमयं मधुरं फलमस्ति । भक्तिज्ञानविरागाद्याप्लावितं मोक्षप्राप्तेः श्रेयस्करं साधनं इति निष्प्रचम् । ग्रन्थेऽस्मिन् साकारनिराकारयोः वर्णनं सम्यग्रूपेण प्राप्यते । भागवतविषये उक्तिरेका प्रसिद्धा वर्तते –

महाऽऽहवे शस्त्रभृतां परीक्षा
धनञ्जये हाटकसम्परीक्षा ।

---

[1] श्रीमद्भागवते २/१०/६ पूर्वार्द्ध

[2] श्रीमद्भागवते २/१०/६ उत्तरार्द्ध

[3] श्रीमद्भागवते ३/२९/१३

विपत्तिकाले गृहिणी परीक्षा

विद्यावतां भागवते परीक्षा ॥[१]

श्रीमद्भागवतं सर्वेषां वेदानामुपनिषदां च तथा षड्दर्शनानामपि सारं संनिहितं वर्तते । शिक्षा–व्याकरण–निरुक्त–कल्प–छन्द–ज्योतिषादिविषयाः अस्मिन् ग्रन्थे समासरूपेण व्यासरूपेण च निरूपिताः महर्षिणा ।

अत एव अस्य ग्रन्थस्य सर्वेषु पुराणेषु वैशिष्ट्यं परिलक्ष्यते । वेदानां मर्मविज्ञातुं भागवतस्यानुशीलनमावश्यकमेव ।

(घ) श्रीमद्भागवतस्य देशकालपरिचयः

श्रीमद्भागवते हि सर्वमतसमन्वयात् शैव–शाक्त–वैष्णवादीनां समानेवास्था विद्यते । भगवद्भक्तिरसाप्लावितत्वादस्योपादेयता सर्वप्रसिद्धास्ति । पुराणेषु शिरोमणिरूपेण अस्य ग्रन्थस्य महिमा प्रसिद्धा वर्तते । ग्रन्थस्यास्य रचनास्थानस्य विषये मतमतान्तरं समुपलभ्यते । अस्मिन् विषयेऽत्र चर्चां प्रस्तौमि ।

देशपरिचयः

श्रीमद्भागवतस्य रचनाक्षेत्रविषये यदि विचारं क्रियते तर्हि विषयेऽस्मिन् नैके मतभेदाः परिलक्षिताः । भागवतमहापुराणं भौगोलिकदृष्ट्या विचारावसरे उत्तरभारतीयतीर्थापेक्षया दक्षिणभारतीयतीर्थैरधिकं परिचितं प्रतीयते । ग्रन्थस्य एकादशस्कन्धस्थपञ्चमाध्याये ३८ तः ४० श्लोकेषु द्रविडदेशस्य

---

[1] प्रसिद्धोऽयं श्लोकः

पवित्रातिपवित्रनदीनां वर्णनं क्रियते । यथा पयस्विनी, कृतमाला, ताम्रपर्णी, कावेरी, महानदी इत्यासां नामग्रहणं विधायाभिहितं विद्यते यत् कलियुगे नारायणपरायणा जनाः कुत्रचिदेव भविष्यन्ति । किन्तु द्रविडदेशे ते बहुलतया भविष्यन्ति तथा पूर्वोक्तानां नदीनां जलस्य पानकर्तारः प्रायो वासुदेवभक्ता भविष्यन्ति । –

कृतादिषु प्रजा राजन् कलाविच्छन्ति सम्भवम् ।
कलौ खलु भविष्यन्ति नारायणपरायणाः ॥
क्वचित् क्वचिन्महाराज द्रविडेषु च भूरिशः ।
ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥
कावेरी च महापुण्या प्रतीची च महानदी ।
ये पिबन्ति जलं तासां मनुजा मनुजेश्वर ।
प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥[1]

अन्यान्यपि प्रमाणान्यप्युपलभ्यन्ते भागवतस्य चतुर्थस्कन्धस्य अष्टाविंशतितमाध्यायस्य द्वयोः श्लोकयोः विदर्भनरेशस्य पुरञ्जनस्य आगामिनि जन्मनि कन्यारूपस्य विवाहः पाण्ड्यनरेशमलयध्वजेन सह अभवत् तथा तस्याः सप्त पुत्राः द्रविडराजनः अभवन् ।

उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ।
युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः ॥
तस्यां स जनयाञ्चक्र आत्मजामसितेक्षणाम् ।
यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः ॥[2]

---

[1] श्रीमद्भागवते ११/५/३८–४०

[2] श्रीमद्भागवते ४/२८/२९–३०

भगवतः ऋषभदेवस्य जीवलीलायाः पर्यवसानं कर्णाटकदेशेऽभवत् तत्रात्य राजा तस्य भक्तो भूतः । तस्य राज्ञः सप्तपुत्रेषु अन्यतमः पुत्रः द्रुमिलः । एतन्नाम एव द्रविडदेशस्य प्राचीनं नाम इति मन्यते ।

द्रविडदेशस्य नृपः सत्यव्रतो यदा कृतमालायां नद्यां स्नाति स्म तदा तस्याञ्जलौ मत्स्यस्य प्रादुर्भावः जातः –

एकदा कृतमालायां कुर्वतो जलतर्पणम् ।
तस्याञ्जल्युदके काचिच्छफर्येकाभ्यपद्यत ॥[१]

सत्यव्रतोऽञ्जलिगतां सह तोयेन भारत ।
उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः ॥[२]

जाम्बवत्याः पुत्रेषु "द्रविड" नामकस्य पुत्रस्योल्लेखः भागवतमहापुराणे समुपलभ्यते ट्ट–

विजयश्चित्रकेतुश्च वसुमान् द्रविडः क्रतुः ।
जाम्बवत्याः सुता ह्येते साम्बाद्याः पितृसम्मताः ॥[३]

श्रीकृष्णस्य ज्येष्ठभ्रातुः वलरामस्य तीर्थयात्रायाः प्रकरणे विशेषतो दक्षिणभारतीयतीर्थनामोल्लेखो समुपलभ्यते । भौगोलिकोल्लेखानां साक्ष्याधारेण एतत् स्पष्टं प्रतिभाति यद् भागवतकारः सामान्यतया दक्षिणभारतेन इतोऽपि विशेषस्तमिलप्रान्तेन सहाधिकः परिचितो वर्तते ।

---

[1] श्रीमद्भागवते ८/२४/१२

[2] श्रीमद्भागवते ८/२४/१३

[3] श्रीमद्भागवते १०/६१/१२

श्रीमद्भागवतस्य कालः

श्रीमद्भागवतस्य कालनिर्णयेऽपि ईदृश्यमेव वहिरङ्गसाक्ष्ये आश्रितोऽस्ति। हेमाद्रिः यादवनरेशमहादेवस्य (१२६०–१९६१ ई.) तथा रामचन्द्रस्य (१२७१–१३०९ ई. ) धर्मात्य आसीत् तथा वोपदेवस्याश्रयदाता च ।

एतेन स्वकीयग्रन्थस्य "चतुवर्गचिन्तामणिः" इत्याख्यस्य "व्रतखण्डे" भागवस्य "स्त्रीशूद्रद्विजबन्धूनाम्" इति श्लोकः उद्धृतः ।

द्वैतमतस्य संस्थापकेनानन्दतीर्थेन (मध्वाचार्यः ११९९ ई.) "भागवततात्पर्यनिर्णये" ग्रन्थे भागवतस्य मौलिकं तात्पर्यं किमिति स्पष्टं निर्देशं कृतम् । तथा एतत् भागवतपुराणं पञ्चमो वेद इति स्वीकृतः । आचार्यरामानुजेन (जन्म १०१७) स्वकीय– वेदान्ततत्त्वसारः इति नाम्नि ग्रन्थे भागवतस्य वेदस्तुतिः (१०/८७) तथा एकदशस्कन्धतः कतिपयश्लोकाः उद्धृताः । एतेन भागवतं तत्पूर्ववर्ति इति सिद्धमेव ।

भगवान् शङ्करावतारः आद्यशङ्कराचार्यः महाभागः एतेन स्वीये प्रबोधसुधाकरे अनेकानि पद्यानि भागवतप्रभावितानि निबद्धानीति ज्ञातुं शक्यते । शङ्कराचार्यस्य गुरुर्गोविन्दभगवत्पादस्य गुरुणा श्रीगौडपादाचार्येण स्वीये "पञ्चीकरणव्याख्याने" भागवताद् "जगृहे पौरुषं रूपम्" इति श्लोक उद्धृतः उत्तरगीतायाः भाष्ये तेन भागवतस्य नामोल्लेखपुरस्सरम् एष प्रख्यातः श्लोक उद्धृतः –

श्रेयः स्रुतिं भक्तिमुदस्य ते विभो
क्लिश्यन्ति ये केवलबोधलब्धये ।
तेषामसौ क्लेशल एव शिष्यते

नान्यद्यथा स्थूलतुषावघातिनाम् ॥[1]

अनेन साक्ष्याधारेण श्रीमद्भागवतं गौडपादाचार्यात् प्राचीनतरम् । शङ्कराचार्यस्याविर्भावकालः ईशापूर्वचतुर्थशताब्दस्यान्त्यमिति विशिष्टैः प्रमाणैः सिद्धः जातः । तस्य पितामहगुरोः गौडपादस्य समयः ईशापूर्वचतुर्थशताब्दस्य आरम्भ आसीदिति युक्तियुक्तः । अत एव ईशापूर्वपञ्चमशताब्दादर्वाचीनं भागवतं कथमपि मन्तुं न युज्यते अपितु प्राचीनमेव ।

(ङ) श्रीमद्भागवतस्य टीकाः

श्रीमद्भागवतमत्यन्तलोकप्रियग्रन्थोऽस्ति । ग्रन्थोऽयं पाठकानां श्रोतॄणां अध्येतॄणाञ्च मध्ये आदितः अद्यावधिपर्यन्तं स्वज्योत्स्नां प्रसारयति । अनेन कारणेन अस्य ग्रन्थस्य उपरि अनेकाः टीकाः विद्वन्मनीषिभिः विरचिताः । टीकासम्पत्तेर्दृष्ट्यापि भागवतपुराणं सर्वेषु महापुराणेषु श्रेष्ठतममग्रगण्यमस्ति । श्रीमद्भागवतमहापुराणं सारगर्भितं प्रेमबहुलं च पुराणमस्ति । अस्य भागवतस्य महत्तां गौरवतां संदृश्य ग्रन्थविषये एका उक्तिः प्रसिद्धा वर्तते – "विद्यावतां भागवते परीक्षे"ति इयमुक्तिः किञ्चिदपि निराधाराभहणकी नास्तीति । सर्वेषां वेदानां सारभूतं ब्रह्मात्मैकत्त्वं एकरूपमद्वितीयं वस्तु अस्य ग्रन्थस्य प्रतिपाद्यं वर्तते । अपि च ग्रन्थेऽस्मिन् प्रतिष्ठितम् ।

अस्य गभीरत्वादस्य निगूढार्थस्य सौगम्यार्थं सरलीकरणार्थञ्च प्राचीनाकालतः अस्मिन्नुपरि टीकाग्रन्थानां रचनाः प्रवर्तमानाः आसन् । तासु टीकासु प्रमुखाणामुपलभ्यमानानां टीकानां विवरणमत्र संक्षेपेण प्रस्तौमि ।

---

[1] श्रीमद्भागवते १०/१४/४

अनेकैर्वैष्णवसम्प्रदायप्रवर्तकैराचार्यैस्तन्मतानुयायिभिः वा आचार्यैः स्वमतानुकूलैः बह्व्यः प्रमाणिक्यः टीकाः भागवतग्रन्थोपरि विरचिताः । तन्माध्यमेनाचार्या भागवतसम्मतं स्वस्वमतमिति प्रदर्शयितुं प्रयतमाना दृश्यन्ते ।

१. श्रीधरस्वामिकृत– भावार्थदीपिका

भागवतोपरि लिखितासु टीकासु श्रीधरस्वामिप्रणीता “भावार्थदीपिका” नाम्नी टीका सर्वप्राचीना सर्वश्रेष्ठा च मन्यते विद्वद्भिः । अस्याः टीकायाः मङ्गलश्लोकेनावगन्तुं शक्यते यदयं महापुरुषः टीकाकारो भगवतो नृसिंहस्योपासक आसीत् । श्रीधराचार्यविषये नैकाः कथाः प्रचलितास्सन्ति । श्रीधराचार्यमहाभागोपरि भगवतः नृसिंहस्य कृपादृष्टिरासीत् । श्रीधरस्य टीकायाः विषये एका सूक्तिरतिप्रसिद्धा वर्तते विद्वन्मानसपटलेषु । सा चेयम् –

व्यासो वेत्ति शुको वेत्ति राजा वेत्ति न वेत्ति वा ।
श्रीधरः सकलं वेति श्रीनृसिंहप्रसादतः ॥[1]

टीकाकर्तुर्भगवदुपासनायाः इदं फलमेव यत् “भावार्थदीपिका”इति नाम्ना रचितायाः टीकायाः ग्रन्थकर्तुर्नाम्ना प्रसिद्धिर्जाता । अत एव “श्रीधरी”ति नाम्ना विख्याता टीकेयं सर्वाधिलोकप्रिया, सर्वाधिकप्रमाणिका, सर्वाधिकलोकभोग्या, सर्वाधिकविद्वद्प्रिया च मन्यते ।

२. सुदर्शनसूरिकृत – शुकपक्षीया

---

[1] प्रसिद्धोऽयं श्लोकः

श्रीरामानुजमहाभागस्य श्रीभाष्योपरि रचिता टीका श्रुतप्रकाशिकायाः रचयिता विशिष्टाद्वैतमतस्य विशिष्टाचार्यः सुदर्शसूरि आसीत् । अस्य समयः चतुर्दशशताब्द्या आसीत् । अस्य विषये श्रूयते यत् देहल्याः वादशाहः अलौद्दीनस्य सेनापतिः यदा १३६७ ई. तमे श्रीरङ्गमुपरि आक्रमणं क्रियते तदा युद्धेऽस्मिन् अस्य मृत्युरभवत् । सुदर्शनसूरेः टीका परिमाणस्वरूपेण स्वल्पं भूते सत्यपि भावप्रकाशने गभीरोऽस्ति ।

३. वीरराघवकृत – भागवतचन्द्रिका

वीरराघवस्यापि टीका अतिप्रसिद्धा वर्तते । अस्य टीका पूर्वोक्तटीकापेक्षया विस्तृतरूपेण वर्तते । अयं वीरराघवः सुदर्शनसूरेः अनुयायी आसीत् । अस्य समयोऽपि १४ शतकमेव स्वीक्रियते । रामानुजस्य मतानुसारं भागवतस्य रहस्यज्ञानाय अनुपमेयं टीका । वीरराघवः वत्सगोत्रीयः श्रीशैलगुरोः पुत्र आसीत् । अस्योल्लेखः स्वयमेव कृतोऽस्ति

४. विजयध्वजकृत – पदरत्नावली

द्वैतमतस्य प्रतिष्ठापकः आचार्यः श्रीमध्वाचार्यः श्रीमद्भागवतस्य रहस्योद्घाटनार्थं "भागवततात्पर्यनिर्णयः" इति नामकं ग्रन्थं प्रणयन् । परञ्च व्याख्येयं वस्तुतः नास्ति विजयध्वजेन पदरत्नावली – अस्यां मध्वमतानुकूलटीका भागवतस्य द्वैतपरकव्याख्या लिखिता । अस्याः टीकायाः प्रारम्भे हि अनेन महाभागेन आनन्दतीर्थस्य विजयतीर्थस्य च ग्रन्थाधारीकृत्यैव स्वटीकानिर्माणस्य चर्चा कृतासीत् –

आनन्दतीर्थ–विजयतीर्थौ प्रणम्य मस्करिवरवन्द्यौ ।

तयोः कृतिं स्फुटमुपजीव्य प्रवच्मि भागवतं पुराणम् ॥[१]

पूर्वोक्तग्रन्थः आनन्दतीर्थस्य प्रसिद्ध वर्तते एव परञ्च विजयतीर्थस्य भागवतविषयकग्रन्थस्योल्लेखः नैव प्राप्यते । आनन्दतीर्थस्य टीका पदरत्नावली सुबोधः प्रमाणिका च वर्तते ।

५. वल्लभाचार्यकृत– सुबोधिनी

शुद्धाद्वैतसम्प्रदायस्य प्रतिष्ठापकः आचार्य वल्लभाचार्यप्रभुपादः आसीत् । अनेन शुद्धाद्वैतमतानुसारेण प्रसिद्धटीका सुबोधिनी नाम्नः लिखिता । इयं टीका सम्पूर्णभागवतोपरि नैवोपलभ्यते । प्रारम्भे कतिपयानां स्कन्धानामतिरिक्तं समग्र–दशमस्कन्धोपरि वर्तते । अस्यां टीकायामत्यन्तगम्भीरा विवेचनात्मकव्याख्या वर्तते । अनेन आचार्येण भागवतस्य स्कन्धानां नूतनदृष्ट्या विभाजनं कृत्वा नूतनार्थानन्वेषणं कृतम् । तेन कथितं यत् भगवतः विष्णोः स्पष्टादेशः सम्प्राप्यैव अस्याः टीकायाः निर्माणं कृतमिति । सम्प्रदायेऽस्य गिरिधरमहाराज–इत्यनेनापि भागवतोपरि टीका विरचिता । यस्यां टीकायां न केवलं स्कन्धानां विषयस्य निरूपणं कृतम्, अपितु तेषामध्यायानां विषयस्यापि सूक्ष्मातिसूक्ष्मरूपेण विभाजनं प्रस्तुतं कृतम् । अनया टीकया भागवतस्य आध्यात्मिकार्थमवगमनाय सहाय्यं भवति ।

६. शुकदेवाचार्यकृत– सिद्धान्तप्रदीपः

श्रीनिम्बार्कमतानुयायिना श्रीशुकदेवाचार्येण भागवतस्य एका “सिद्धान्तप्रदीपः” नाम्नी टीका संलिख्य स्वीयसिद्धान्ताः प्रकाशिताः । इयं टीका सम्पूर्णे भागवतेऽस्ति । निम्बार्कमतानुयायिभिरन्यैरपि आचार्यैः दशमस्कन्धस्य

[1] पदरत्नावलीटीकायाः प्रारम्भे

रासलीलादिप्रसङ्गेषु बहवयः सरसा मनोज्ञाः च व्याख्याः प्रस्तुताः । सम्प्रतीयं टीका नैवोपलभ्यते ।

७. सनातनगोस्वामिकृत– बृहद्वैष्णवतौषिणी

श्रीचैतन्यस्वामिश्रीधरस्वामिप्रणीतटीकामेव स्वमतसम्पुष्टये प्रमाणत्वेन आमन्यत, परञ्च तस्यानुयायिभिः गोस्वामिभिर्भागवतोपरि नानाटीकाः रचिताः । यासु सनातनगोस्वामिप्रणीता "बृहद्वैष्णवतोषिणी" नाम्नी टीका प्राचीनतमा अन्यापेक्षया प्रामाणिकतमा च मन्यते । किन्त्वेषा केवले दशमस्कन्धे एव प्राप्यते ।

८. जीवगोस्वामिकृत– क्रमसन्दर्भः

जीवगोस्वामी श्रीमद्भागवतस्य अनुपमेयमार्मिकः विद्वानासीत् । अस्य टीकेयं समग्रभागवतोपरि वर्तते । व्याख्यानदृष्ट्यापि प्रमाणिका तलस्पर्शिनी च वर्तते । श्रीमद्भागवतपुराणस्य गूढार्थस्य अभिव्यक्तये तेन "षड्सन्दर्भः" नामके ग्रन्थे षड्सन्दर्भानां पृथक् चर्चा कृता । अयं क्रमसन्दर्भः तस्य सप्तमसन्दर्भोऽस्ति । स्वपितृव्यस्वरूपसनातनगोस्वामेः आज्ञया निर्मितभूतत्वात् अस्य ग्रन्थस्यापरनाम "रूपसनातनानुशासनभारतीगर्भः"इति सम्बोधयते । अस्य ग्रन्थस्य पुष्पिकायां लिखितम् –

श्रीरूपसनातनानुसारेण भारतीगर्भे सप्तसन्दर्भात्मकं
श्रीभागवतसन्दर्भे प्रथमस्कन्धस्य क्रमसन्दर्भः समाप्तः ।

९. विश्वनाथचक्रवर्ती–कृत– सारार्थदर्शिनी

चैतन्यसम्प्रदायस्य सर्वमान्याचार्येण श्रीविश्वनाथचक्रवर्तिना श्रीमद्भागवतोपरि अत्यन्तसुबोधटीका निबद्धा कृता । या श्रीधरस्वामिप्रभुचैतन्यादिटीकाकाराणां व्याख्यानानां सारसंकलनात् सारार्थदर्शिनी" इति नाम्ना सुविख्याता –

श्रीधरस्वामिनां श्रीमत्प्रभूणां श्रीमुखाद् गुरोः ।
व्याख्यासु सारग्रहणात् इयं सारार्थदर्शिनी ।[1]

सा लघ्वक्षराप्यत्यन्तगभीरा वर्तते । गोदावरीतटनिवासिना काश्यपगोत्रोत्पनेन श्रीहरिणा "हरिभक्तिरसायन"नाम्नी अतीव मनोहरा टीका निर्मिता । तेन दशमस्कन्धस्य पूर्वार्ध एव पद्यात्मको ग्रन्थरूपो रचितः । अस्मिन् एकोनपञ्चाशदध्यायाः सन्ति । तेषु विविधच्छन्दःसु पञ्चसहस्त्रं श्लोकाः रचिताः।

वस्तुतोऽयं मौलिको ग्रन्थो न केवला टीका अपितु अत्र भागवति वार्ता सम्यग्रूपेण उपवर्णिता इति । पूर्वोक्तटीकाकारेभ्यो अतिरिक्ता अन्येऽपि सन्ति व्याख्यातारो यैः स्वरचितैर्व्याख्यानग्रन्थैः टीकाभिर्वा भागवतं सुसज्जीकृतम् । यथोहि जीवगोस्वामिपादेन स्वकीये "तत्त्वसन्दर्भे"६७ तमे पृष्ठे हनुमद्भाष्यम्, वासनाभाष्यम्, सम्बन्धोक्ति, विद्वत्कामधेनु, तत्त्वदीपिका, भावार्थदीपिका, परमहंसप्रिया, शुकहृदयश्चेत्यादीनां व्याख्याग्रन्थानामुल्लेखः स्पष्टरूपेण निर्दिश्यते । येषु भावार्थदीपिकातोऽतिरिक्ता अन्ये ग्रन्थाः सम्प्रति अप्रसिद्धाः । एतदतिरिक्ता श्रीगङ्गासहायविद्यावाचस्पतिमिश्रस्य "अन्वितार्थ–प्रकाशिकाटीका"

---

[1] टीकायाः पुष्पिकायाम्

श्रीगिरिधरलालविरचिता “बालप्रबोधिनी” अन्या च “वंशीधरी चूर्णिका” इत्यादिटीकाः सम्प्रत्युपलब्धाः प्रसिद्धाः चेति ।

-----------------